# Shri Nilakanthavarninah Murtisvarupavarnanam

# શ્રીનીલકણ્ઠવર્ણિનઃ મૂર્તિસ્વરૂપવર્ણનમ્

## Document Information

Text title : Shri Nilakanthavarninah Murtisvarupavarnanam

File name : nIlakaNThavarNinaHmUrtisvarUpavarNanam.itx

Category : vishhnu, svAminArAyaNa, krishna, gurudev, deities_misc

Location : doc_vishhnu

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીનીલકણ્ઠવર્ણિનઃ મૂર્તિસ્વરૂપવર્ણનમ્

(શાર્દૂલવિક્રીડિતમ્)
મૂર્ધ્નિ સ્નિગ્ધસુમઞ્જુલાસિતસટાં દેદીપ્યમાનાં જટાં
બિભ્રચ્ચૈવ વિશાલભાલફલકે પુણ્ડ્રં સચન્દ્રં શુભમ્ ।
વિષ્ણોઃ સમ્પુટકં તથા ચ વિમલાં કણ્ઠે સ્રજં તૌલસ
સોઽયં દિવ્યતનુર્હૃદિ સ્ફુરતુ મે શ્રીનીલકણ્ઠઃ સદા ॥ ૧॥

હસ્તાબ્જે જપમાલિકાં વરતરાં બિભ્રત્ સિતં સૂત્રકં
મૌ પીઙ્ગલમેખલાં કટિતટે કૌપીનમાચ્છાદનમ્ ।
સર્વાઙ્ગે વિવિધાનિ ચૈવ તપસશ્ચિહ્નાનિ બિભ્રદ્ મુદા
સોઽયં દિવ્યતનુર્હૃદિ સ્ફુરતુ મે શ્રીનીલકણ્ઠઃ સદા ॥ ૨॥

કન્દર્પાસ્ત્રસમાનદીર્ઘકુટિલ શ્લક્ષ્ણાસિત ભ્રૂલો
દીર્ઘપ્રાન્તનિમીલિતાક્ષિયુગલો નાસાગ્રદૃષ્ટિઃ સદા ।
વર્ણીન્દ્રો નવમેઘમેચકતનૂરૈણસ્થિતઃ સ્વાત્મદૃક્
સોઽયં દિવ્યતનુર્હૃદિ સ્ફુરતુ મે શ્રીનીલકણ્ઠઃ સદા ॥ ૩॥

અસ્થિત્વગ્વપુરેવ તીવ્રતપસા નિત્યં તપસ્યારુચિઃ
શિક્ષાર્થં તપતાં તથાપિ તપતામિન્દ્રસ્તપસ્વિસ્તુતઃ ।
શ્રીમચ્છારદપૂર્ણચન્દ્રવિલસત્સ્મેરાનનઃ શ્રીહરિઃ
સોઽયં દિવ્યતનુર્હૃદિ સ્ફુરતુ મે શ્રીનીલકણ્ઠઃ સદા ॥ ૪॥

ઇતિ શ્રીસ્વામિનારાયણબાપાચરિત્રામૃતસાગરે દ્વિતીયપ્રવાહે
દ્વાવિંશતિતમે તરઙ્ગે શ્રીનીલકણ્ઠવર્ણિનઃ સ્વરૂપવર્ણનં સમ્પૂર્ણમ્ ।

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*